# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – साहित्य | **CC-124** | समयः - ११ तः २ |
| दिनाङ्कः - २३/४/२०१६ | सन्दर्भग्रन्थः – शिशुपालवधम् – द्वितीयसर्गः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) न दूये सात्वतीसूनुर्यन्महयमपराध्यति ।<br>यत्तु दन्दहयते लोकमदो दुःखाकरोति माम् ॥<br>(२) विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् ।<br>प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम् ॥<br>(३) वासुदेवेनादीनमनादीनवभीरितम् ।<br>वचसस्तस्य सपदि क्रिया केवलमुत्तरम् ॥ | |
| **प्रश्नः -२** | माघस्य जीवनकवनपरिचयं लिखत ।<br>अथवा<br>बलरामस्य नीतिवर्णनं यथाग्रन्थं लिखत । | ०८ |
| **प्रश्नः -३** | **निम्नेषु द्वयोः टिप्पणी लेख्या ।** | ०४ |
| | (१) ज्ञातसारोऽपि खल्वेकः सन्दिग्धे कार्यवस्तुनि ।<br>(२) पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः ।<br>(३) इन्धनौघघगप्यग्निस्त्विषा नात्येति पूषणम् ।<br>(४) अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते । | |
| **प्रश्नः - ४** | **निम्नेशु पञ्चानामतिलघुत्तरं लिखत ।** | ०५ |
| | (१) शिशुपालवधे कति सर्गाः सन्ति ?<br>(२) माघस्य उपनाम किमस्ति ?<br>(३) कः कार्यद्वयाकुलः आसीत् ?<br>(४) हरिः कयोः विप्रतिषेधम् आचचक्षे ?<br>(५) शिष्टैः कौ समौ आम्नातौ ?<br>(६) के प्रकृत्या मितभाषिणः भवन्ति ?<br>(७) के जडान् अपि अनुलोमार्थान् कुर्वन्ति ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् ।<br>हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥<br>(२) सामवादाः सकोपस्य तस्य प्रत्युतदीपकाः ।<br>व्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥<br>(३) नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये । | |

| | | |
|---|---|---|
| | विधुर्विधुन्तुदस्यैव पूर्णस्तस्योत्सवाय सः ॥ | |
| प्रश्नः -६ | शिशुपापवधस्य द्वितीयसर्गस्य सारं लिखत ।<br>अथवा<br>उद्धवनीतिं यथाग्रन्थं लिखत । | ०८ |
| **प्रश्नः -७** | **निम्नयोरेका टिप्पणी लेख्या ।** | ०२ |
| | (१) देहिनतद्वरं रजः ।<br>(२) स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति । | |
| **प्रश्नः -८** | **निम्नेषु द्वयोरतिलघूत्तरं लिखत ।** | ०२ |
| | (१) शिशुपालवधस्य द्वितीयसर्गस्य किं नाम ?<br>(२) कस्य अजननिखोऽस्तु ?<br>(३) मनस्विति अलङ्घनीयाहेतुः उभयं किं भवति ?<br>(४) किम् अकृत्वा कीर्तिः द्यां नाऽधिरोहति ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **निम्नेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि ।<br>तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसम्पदः ॥<br>(२) उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।<br>जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥<br>(३) स्थायिनोऽर्थे प्रवर्तन्ते भाषाः सञ्चारिणो यथा ।<br>रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ | |
| प्रश्नः -१० | माघे सन्ति त्रयो गुणाः इति सूक्तिं शिशुपालवधमाश्रित्य प्रतिपादयत ।<br>अथवा<br>शिशुपालवधस्य वैशिष्ट्यं प्रतिपादयत । | ०८ |
| **प्रश्नः -११** | **निम्नेषु द्वयोः टिप्पणी लेख्या ।** | ०४ |
| | (१) महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ।<br>(२) हन्ति नोपशयस्योऽपि शयालुर्मृगयुमृगान् ।<br>(३) अयथाबलमारम्भो निदानं क्षयसम्पदः ।<br>(४) निहन्त्यरीनेकपदे य उदात्तः स्वरानिवः । | |
| **प्रश्नः -१२** | **निम्नेशु पञ्चानामतिलघूत्तरं लेख्यम् ।** | ०५ |
| | (१) द्वितीयसर्गस्य नाम किमस्ति ?<br>(२) द्वितीयसर्गे कति श्लोकाः सन्ति ?<br>(३) कालज्ञस्य महीपतेः एकान्तं किं न भवति ?<br>(४) किम्मूलः उत्साहपादपः फलति ?<br>(५) कस्य अङ्गानि स्थास्नूनि बलवन्ति च भवन्ति ?<br>(६) बाणः केन सन्धानमेष्यति ?<br>(७) कः क्षोदीयानपि कार्यान्तं गच्छति ? | |

***